## अक्षशलाकासङ्ख्याः परिणा। (१०/६६४)

[1]अक्षशब्दः, शलाकाशब्दः, [2]सङ्ख्याशब्दश्च परिणा सह समस्यन्ते, अव्ययीभावश्च समासो भवति। कितवव्यवहारे [3]समासोऽयमिष्यते। पञ्चिका नाम [4]द्यूतं पञ्चभिरक्षैः शलाकाभिर्वा[5] भवति। तत्र यदा सर्वे उत्तानाः पतन्ति अवाञ्चो वा, तदा [6]पातयिता जयति, तस्यैवास्य विघातोऽन्यथा पाते सति [7]जायते। अक्षेणेदं न तथा वृत्तं यथा पूर्वं जये (म. भा. १.३७९) अक्षपरि। शलाकापरि। एकपरि। [8]द्विपरि। त्रिपरि। [9]परमेण चतुष्परि।

पञ्चसु[10]त्वेकरूपासु जय एव भविष्यति।

अक्षादयस्तृतीयान्ताः पूर्वोक्तस्य यथा न तत्।
कितवव्यवहारे च एकत्वेऽक्षशलाकयोः (म. भा. १.३८०)॥

## विभाषा। (११/६६५)

विभाषा इत्ययमधिकारो वेदितव्यः (म. भा. १.३८०)। यदित ऊर्ध्वमनुक्रमिष्यामः, तद्विभाषा भवति। वक्ष्यति–'अपपरिबहिरञ्चवः पञ्चम्या' (२.१.१२/६६६)। अपत्रिगर्तं वृष्टो देवः, अप त्रिगर्तेभ्यः[11]॥

## अपपरिबहिरञ्चवः पञ्चम्या। (१२/६६६)

अप परि बहिस् अञ्चु इत्येते सुबन्ताः पञ्चम्यन्तेन सह [12]विभाषा समस्यन्ते, अव्ययीभावश्च समासो भवति। अपत्रिगर्तं वृष्टो देवः, अप त्रिगर्तेभ्यः[13]। परित्रिगर्तम्[14], परि त्रिगर्तेभ्यः[15]। बहिर्ग्रामम्, बहिर्ग्रामात्। प्राग्ग्रामम्, प्राग् ग्रामात्। बहिः[16]शब्दयोगे पञ्चमीभावस्यैतदेव ज्ञापकम्॥

## आङ् मर्यादाभिविध्योः। (१३/६६७)

आङ इत्येतन् [17]मर्यादायामभिविधौ च वर्तमानं पञ्चम्यन्तेन सह विभाषा समस्यते, अव्ययीभावश्च समासो भवति। आपाटलिपुत्रं वृष्टो देवः, आ पाटलिपुत्रात्[18]। अभिविधौ–आकुमारं यशः पाणिनेः, आ कुमारेभ्यः[19]॥

## लक्षणेनाभिप्रती आभिमुख्ये। (१४/६६८)

लक्षणं चिह्नं, तद्वाचिना सुबन्तेन सह अभिप्रती शब्दावाभिमुख्ये वर्तमानौ [20]विभाषा समस्येते, अव्ययीभावश्च समासो भवति। अभ्यग्नि शलभाः पतन्ति, अग्निमभि[21]। [22]प्रत्यग्नि, अग्निं प्रति। अग्निं [23]लक्ष्यीकृत्य अभिमुखं पतन्ति इत्यर्थः। लक्षणेन इति किम्? [24]स्रुघ्नं प्रतिगतः। प्रतिनिवृत्य स्रुघ्नमे[25]वाभिमुखं गतः। अभिप्रती इति किम्? येनाग्निस्तेन गतः। आभिमुख्ये इति किम्? अभ्यङ्का गावः। प्रत्यङ्का गावः। [26]नवाङ्का इत्यर्थः॥

---

1. अक्षशलाकासंख्याशब्दाः क. 2. सङ्ख्या च ड, सङ्ख्यावाचिनः शब्दाश्च ह. 3. चायमिष्यते समासः ड. 4. द्यूतविशेषः क. इ. 5. वा नास्ति ब. 6. आपातयिता फ. 7. भवति क. फ. ह. 8. द्विपरि नास्ति फ. 9. परेण चतुष्परि क, चतुःपरि ड. 10. त्वेकरूपेषु ड. 11. वृष्टो देवः ड, परित्रिगर्तेभ्यः वृष्टो देवः क. इ, परित्रगर्तं वृष्टो देवः, परि त्रिगर्तेभ्यः वृष्टो देवः ह. 12. विभाषा नास्ति फ. 13–15. वृष्टो देवः इत्यधिकम् इ. फ. 16. शब्दयोगेन क. 17. मर्यादाभिविध्योः क. 18. वृष्टो देवः इत्यधिकम् फ. 19. यशः पाणिनेः इत्यधिकम् इ. 20. विभाषा नास्ति फ. 21. अत्र चाग्निर्लक्षणं तेन शलभपातो लक्ष्यते। प्रत्यग्नि शलभाः पतन्ति इत्यधिकम् ड, उदाहरणमिदं नास्ति फ. 22. उदाहरणमिदं नास्ति फ. 23. लक्षीकृत्य ड. इ, अग्निं लक्ष्यीकृत्य नास्ति फ. 24. स्रुघ्नं नास्ति ह. 25. एव नास्ति ह. 26. नवाङ्का इत्यर्थः नास्ति ब.फ, अभिनवाङ्का गाव इत्यर्थः क. ड. इ. ह.